
द्वितीयः पाठः

# २ योऽधीतविद्यः सकलः स सर्वेषां गुरुर्भवेत्

प्राचीनभारतीयेषु अध्ययनविषयेषु नीतिशास्त्रस्य महत्त्वपूर्णं स्थानं विद्यते। नीतिशास्त्रं धर्मशास्त्रस्य एव अङ्गम्। नीतिशास्त्रवाङ्मये *शुक्रनीतिग्रन्थस्य* विशिष्टं स्थानमस्ति। अयं ग्रन्थः शुक्राचार्येण विरचितः। अस्मिन् *शुक्रनीतिग्रन्थे* राज्यव्यवस्था दण्डनीतिः अर्थनीतिः प्रजापालनं शिक्षाव्यवस्था सामाजिकव्यवस्था इत्यादयः विषयाः विस्तरेण निरूपिताः सन्ति। लोककल्याणस्य सुशासनस्य आदर्शसमाजस्य च स्थापनायै अयं ग्रन्थः मार्गदर्शकः अस्ति। अयं पाठः शुक्रनीतेः चतुर्थस्य अध्यायस्य तृतीयप्रकरणतः संकलितः। अस्मिन् पाठे विद्यानां शास्त्राणां कलानां च लक्षणानि भेदाः च प्रतिपादिताः।



योऽधीतविद्यः सकलः स सर्वेषां गुरुर्भवेत्।
न च जात्यानधीती यो गुरुर्भवितुमर्हति ॥१॥

विद्या ह्यनन्ताश्च कलाः संख्यातुं नैव शक्यते।
विद्या मुख्याश्च द्वात्रिंशच्चतुःषष्टिः कलाः स्मृताः ॥२॥

यद्यत्स्याद्वाचिकं सम्यक्कर्म विद्याभिसंज्ञकम्।
शक्तो मूकोऽपि यत्कर्तुं कलासंज्ञं तु तत्स्मृतम् ॥३॥

उक्तं संक्षेपतो लक्ष्म विशिष्टं पृथगुच्यते।
विद्यानां च कलानां च नामानि तु पृथक् पृथक् ॥४॥

ऋग्यजुःसाम चाथर्व वेदा आयुर्धनुः क्रमात्।
गान्धर्वश्चैव तन्त्राणि उपवेदाः प्रकीर्तिताः ॥५॥

शिक्षा व्याकरणं कल्पो निरुक्तं ज्यौतिषं तथा।
छन्दः षडङ्गानीमानि वेदानां कीर्तितानि हि ॥६॥


मीमांसातर्कसांख्यानि वेदान्तो योग एव च।
इतिहासाः पुराणानि स्मृतयो नास्तिकं मतम् ॥७॥

अर्थशास्त्रं कामशास्त्रं तथा शिल्पमलङ्कृतिः।
काव्यानि देशभाषाऽवसरोक्तिर्यावनं मतम् ॥८॥

देशादिधर्मा द्वात्रिंशदेता विद्याभिसंज्ञिताः।
स्वस्वधर्मपरो लोको यस्य राष्ट्रे प्रवर्तते ॥९॥

धर्मनीतिपरो राजा चिरं कीर्तिं स चाश्नुते।
भूमौ यावद्यस्य कीर्तिस्तावत्स्वर्गे स तिष्ठति ॥१०॥

© NCERT not to be republished



वेदाः
ऋग्वेदः
यजुर्वेदः
सामवेदः
अथर्ववेदः
उपवेदाः
आयुर्वेदः
धनुर्वेदः
गन्धर्ववेदः
अर्थवेदः/स्थापत्यवेदः
वेदाङ्गानि
शिक्षा
कल्पः
व्याकरणम्
निरूक्तम्
छन्दः
ज्योतिषम्
दर्शनानि
न्यायः
वैशेषिकः
सांख्यम्
योगः
मीमांसा
वेदान्तः
स्मृतयः
मनुस्मृतिः
याज्ञवल्क्यस्मृतिः
पराशरस्मृतिः

## सर्वं शब्देन भासते

| शब्दः | अर्थः | हिन्दी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| अधीतविद्यः (बहुव्रीहिः) | अधीता विद्या येन सः | जिसने विद्या ग्रहण की हो | one who has attained knowledge | |
| अनधीती (नञ् तत्पुरुषः) | न अधीती | जिसने विद्या ग्रहण न की हो | one who has not attained knowledge | |
| अर्हति (√अर्ह्) | योग्यः भवति | योग्य होता है | one who deserves, is worthy | |
| उपवेदाः | वेदानुगतविद्याः | उपवेद | auxiliary vedas | |
| कलाः | कौशलानि | कलाएँ | arts, skills | |
| गान्धर्वः (गंधर्व+अण्) | गन्धर्वसम्बद्धः | संगीतशास्त्र | musicology | |
| जात्या | जन्मना | जाति से | by birth | |
| तन्त्राणि | तन्त्रशास्त्राणि | तन्त्रशास्त्र | tantras | |
| प्रकीर्तिताः (प्र + √कीर्त्) | प्रसिद्धाः | बताए गए | declared | |
| मूकः | यः वक्तुम् असमर्थः | गूँगा | dumb | |
| वाचिकम् | वाणीसम्बन्धि | वाणी से सम्बन्धित | verbal | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| विद्याभिसंज्ञकम् (बहुव्रीहि) | विद्या इति अभिसंज्ञा यस्य तत् | विद्या नाम वाला | known by knowledge | |
| मीमांसातर्क-सांख्यानि (द्वन्द्वः) | मीमांसा तर्कः सांख्यं च | मीमांसा, तर्कशास्त्र, सांख्यदर्शन | mimamsa, logicology and samkhya philosophy | |
| नास्तिकं मतम् | नास्तिकानां मतम् | वेद को न मानने वाला मत | atheist doctrine | |
| अलङ्कृतिः (अलम् + √कृ+ क्तिन्) | अलङ्कारशास्त्रम् | अलंकरण की विद्या | ornamentation, aesthetics | |
| अवसरोक्तिः (कर्मधारयः) | अवसरोचिता उक्तिः | अवसर के अनुसार कही गई बात | appropriate speech | |
| यावनम् | यवनविद्या | यवनों (विदेशियों) की विद्या | foreign learning | |
| देशादिधर्माः (षष्ठीतत्पुरुषः) | देशादीनां धर्माः | देश के रीति-रिवाज | local customs and traditions | |
| स्वस्वधर्मपरः (सप्तमीतत्पुरुषः) | स्वकीये धर्मे परः रतः | अपने अपने धर्म/कर्तव्य में तत्पर | devoted to one's duty | |
| धर्मनीतिपरः (सप्तमीतत्पुरुषः) | धर्मे नीतौ च परः रतः | धर्म और नीति का पालन करने वाला | devoted to righteousness and ethics | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

अनुष्टुप् छन्दः — अस्मिन् पाठे यस्य छन्दसः प्रयोगः वर्तते तस्य अनुष्टुप् इति संज्ञा वर्तते। तस्य सामान्यं लक्षणम् -

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम्।**
**द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः॥**

अर्थः — अनुष्टुप्-श्लोके चतुर्षु अपि पादेषु षष्ठम् अक्षरं दीर्घं पञ्चमम् अक्षरं च लघु बोध्यम्। द्वितीयचतुर्थचरणयोः सप्तमम् अक्षरं लघु ज्ञेयम्। प्रथमतृतीययोः चरणयोः सप्तमम् अक्षरं दीर्घं बोध्यम्।

यथा —

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्॥**

परन्तु क्वचित् क्वचित् प्रयोगेषु अस्य लक्षणस्य अपवादः दृश्यते।

यथा — **योऽधीतविद्यः सकलः** इत्यादिः।

## अभ्यासाद् जायते सिद्धिः

१. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत —**

(क) कः सर्वेषां गुरुः भवेत्?

(ख) कीदृशः राजा चिरं कीर्तिम् अश्नुते?

(ग) वेदाङ्गानि कानि सन्ति?

(घ) किं कलासंज्ञकं स्मृतम्?

(ङ) काः संख्यातुं नैव शक्यन्ते?

(च) किं कर्म विद्याभिसंज्ञकम्?

२. उचितं विकल्पं चित्वा द्वयोः स्तम्भयोः मेलनं कुरुत —

| अ स्तम्भः | ब स्तम्भः |
|---|---|
| (क) ऋक् | (१) विद्यास्थानम् |
| (ख) गान्धर्वः | (२) वेदः |
| (ग) व्याकरणम् | (३) नीतिशास्त्रग्रन्थः |
| (घ) अर्थशास्त्रम् | (४) वेदाङ्गम् |
| (ङ) शुक्रनीतिः | (५) उपवेदः |

३. अधोलिखितासु पङ्क्तिषु विद्यमानानि सर्वनामानि परिचिनुत रेखाङ्कनं च कुरुत —

यथा — <u>यः</u> अधीतविद्यः सकलः <u>स</u> सर्वेषां गुरुः भवेत्।

(क) न च जात्यानधीती यः गुरुः भवितुमर्हति।

(ख) शक्तो मूकोऽपि यत् कर्तुं कलासंज्ञं तु तत् स्मृतम्।

(ग) देशादिधर्मा द्वात्रिंशत् एताः विद्याभिसंज्ञिताः।

(घ) स्वस्वधर्मपरो लोको यस्य राष्ट्रे प्रवर्तते।

(ङ) धर्मनीतिपरो राजा चिरं कीर्तिं स चाश्नुते।

(च) भूमौ यावद् यस्य कीर्तिस्तावत्स्वर्गे स तिष्ठति।

४ अधोलिखितेषु उदाहरणेषु सन्धिविच्छेदं कुरुत —

यथा — विद्या ह्यनन्ताश्च – विद्याः हि अनन्ताः च

(क) योऽधीतविद्यः

(ख) स चाश्नुते

(ग) वेदान्तो योग एव

(घ) लोको यस्य

(ङ) कीर्तिस्तावत्

(च) स तिष्ठति

(छ) पृथगुच्यते



© NCERT not to be republished

६. उदाहरणानुसारं विग्रहवाक्यानां समस्तपदानि पाठात् चित्वा लिखत —

| | | |
|---|---|---|
| **यथा** — अधीता विद्या येन सः | — | अधीतविद्यः |
| (क) स्वधर्मे परः | — | ........................ |
| (ख) देशादीनां धर्माः | — | ........................ |
| (ग) मीमांसा च तर्कः च साङ्ख्यं च | — | ........................ |
| (घ) विद्या अभिसंज्ञा यस्य तत् | — | ........................ |
| (ङ) देशस्य भाषा | — | ........................ |

## स्वाध्यायान्मा प्रमदः

**श्लोकः – १**

**पदच्छेदः** – यः अधीतविद्यः सकलः सः सर्वेषां गुरुः भवेत् न च जात्या अनधीती यः गुरुः भवितुम् अर्हति

**अन्वयः** – यः अधीतविद्यः सकलः सः सर्वेषां गुरुः भवेत्। यः अनधीती सः जात्या (एव) गुरुः भवितुं न अर्हति।

**भावार्थः** – यः जनः समस्तानां विद्यानां कलानां च सम्यग् अध्ययनं कृतवान् सः एव सर्वेषां गुरुः भवितुं योग्यः भवति। यः जनः विद्याध्ययनं न कृतवान् सः जातिमात्रेण गुरुः भवितुं न अर्हति।

**श्लोकः – २**

**पदच्छेदः** – विद्याः हि अनन्ताः च कलाः संख्यातुं न एव शक्यते विद्याः मुख्याः च द्वात्रिंशत् चतुःषष्टिः कलाः स्मृताः

**अन्वयः** – विद्याः कलाः च अनन्ताः हि (सन्ति अतः ताः) संख्यातुं नैव शक्यन्ते। मुख्याः विद्याः द्वात्रिंशत् कलाः च चतुःषष्टिः स्मृताः।

**भावार्थः** – विद्याः कलाः च अनन्ताः सन्ति। अतः तासां गणनाऽपि कर्तुं न शक्यते। तथापि स्थूलरूपेण मुख्याः विद्याः द्वात्रिंशत्संख्याकाः कलाः च चतुष्षष्टिसंख्याकाः प्रसिद्धाः सन्ति।

© NCERT not to be republished

**श्लोकः – ३**

**पदच्छेदः** – यत् यत् स्यात् वाचिकम् सम्यक् कर्म विद्याभिसंज्ञकम् शक्तः मूकः अपि यत् कर्तुम् कलासंज्ञम् तु तत् स्मृतम्

**अन्वयः** – यत् यत् वाचिकं कर्म सम्यक् स्यात् (तत्) विद्याभिसंज्ञकम्। यत् कर्म मूकः अपि कर्तुं शक्तः तत् कलासंज्ञं स्मृतम्।

**भावार्थः** – यत् कर्म वाचा सम्यक्तया सम्पाद्यते तत् विद्यासंज्ञकं स्यात्। यत्कर्म मूकः अपि सरलतया कर्तुं समर्थः तत्कर्म कलासंज्ञकं स्यात्।

**श्लोकः – ४**

**पदच्छेदः** – उक्तं संक्षेपतः लक्ष्म विशिष्टम् पृथक् उच्यते विद्यानाम् च कलानाम् च नामानि तु पृथक् पृथक्

**अन्वयः** – (विद्यानां कलानां च) लक्ष्म संक्षेपतः उक्तम् विशिष्टं पृथक् उच्यते। विद्यानां कलानां च नामानि तु पृथक् पृथक् (उच्यन्ते)।

**भावार्थः** – विद्यानां कलानां च लक्षणं संक्षेपेण उक्तम्। अधुना विद्यानां कलानां च विशिष्टं लक्षणं नामानि च पृथक् पृथक् उच्यन्ते।

**श्लोकः – ५**

**पदच्छेदः** – ऋक् यजुः साम च अथर्व वेदाः आयुः धनुः क्रमात् गान्धर्वः च एव तन्त्राणि उपवेदाः प्रकीर्तिताः

**अन्वयः** – ऋक् यजुः साम अथर्व च वेदाः (सन्ति) क्रमात् आयुः धनुः गान्धर्वः तन्त्राणि च उपवेदाः प्रकीर्तिताः।

**भावार्थः** – *ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः* इति चत्वारः वेदाः सन्ति। *आयुर्वेदः धनुर्वेदः गान्धर्ववेदः तन्त्रवेदः* (अर्थवेदः) च चत्वारः उपवेदाः प्रकीर्तिताः सन्ति।

**श्लोकः – ६**

**पदच्छेदः** – शिक्षा व्याकरणम् कल्पः निरुक्तम् ज्यौतिषम् तथा छन्दः षड् अङ्गानि इमानि वेदानाम् कीर्तितानि हि

**अन्वयः** – शिक्षा व्याकरणम् कल्पः निरुक्तम् ज्यौतिषम् तथा छन्दः (च) इमानि हि वेदानां षड् अङ्गानि कीर्तितानि (सन्ति)।

**भावार्थः** – *शिक्षा व्याकरणं कल्पः निरुक्तं ज्यौतिषं छन्दः* च इत्येतानि वेदानां षड् अङ्गानि सन्ति।



© NCERT not to be republished

**श्लोकः – ७,८,९** (मीमांसा–तर्क–सांख्यानि .......... एता विद्याभिसंज्ञिताः।)

**पदच्छेदः** – मीमांसा–तर्क–सांख्यानि वेदान्तः योगः एव च इतिहासाः पुराणानि स्मृतयः नास्तिकम् मतम्। *अर्थशास्त्रम् कामशास्त्रम्* तथा शिल्पम् अलङ्कृतिः काव्यानि देशभाषा अवसरोक्तिः यावनम् मतम्। देशादिधर्माः द्वात्रिंशत् एताः विद्याभिसंज्ञिताः

**अन्वयः** – *मीमांसा–तर्क–सांख्यानि* वेदान्तः योगः एव च इतिहासाः पुराणानि स्मृतयः नास्तिकं मतं च। *अर्थशास्त्रं कामशास्त्रं* तथा *शिल्पम् अलङ्कृतिः* काव्यानि देशभाषा अवसरोक्तिः यावनं मतं देशादिधर्माः च एताः द्वात्रिंशत् विद्याभिसंज्ञिताः (भवन्ति)।

**भावार्थः** – *मीमांसाशास्त्रं तर्कशास्त्रं सांख्यशास्त्रं वेदान्तशास्त्रं योगशास्त्रम्* इतिहासः पुराणानि स्मृतयः नास्तिकं मतम् *अर्थशास्त्रं कामशास्त्रं शिल्पशास्त्रम् अलङ्कारशास्त्रं* काव्यानि देशभाषाज्ञानम् अवसरानुकूलं भाषाकौशलं यावनमतं देशादिधर्माः च इति एतानि विद्यास्थानानि सन्ति।

**श्लोकः – ९,१०** (स्व–स्व–धर्मपरः लोकः ....... तावत् स्वर्गे सः तिष्ठति।)

**पदच्छेदः** – स्व–स्व–धर्मपरः लोकः यस्य राष्ट्रे प्रवर्तते धर्मनीतिपरः राजा चिरं कीर्तिम् सः च अश्नुते भूमौ यावत् अस्य कीर्तिः तावत् स्वर्गे सः तिष्ठति

**अन्वयः** – यस्य राष्ट्रे लोकः स्वस्वधर्मपरः प्रवर्तते (यः) राजा धर्मनीतिपरः (भवति) सः चिरम् कीर्तिम् अश्नुते भूमौ अस्य कीर्तिः यावत् (भवति) तावत् सः स्वर्गे तिष्ठति

**भावार्थः** – यस्य राष्ट्रस्य जनाः स्वीये स्वीये धर्मे तत्पराः सन्तः तदनुगुणमेव व्यवहरन्ति तद् राष्ट्रं श्रेष्ठं भवति। यः राजा धर्मपरायणः नीतिमान् च भवति सः चिरकालपर्यन्तं कीर्तिं प्राप्नोति। यावत् भूमौ तस्य कीर्तिः तिष्ठति तावत् सः स्वर्गेऽपि स्थानं प्राप्नोति।

**वैदिकं वाङ्मयम्** – वाङ्मयं द्विविधम् अस्ति शास्त्रं काव्यं च। शास्त्रमपि द्विविधम् अस्ति अपौरुषेयं पौरुषेयं च। अपौरुषेयं शास्त्रं श्रुतिः इति कथ्यते। श्रुतिः नाम वेदः। वेदानां चत्वारो भागाः – संहिता ब्राह्मणम् आरण्यकम् उपनिषत् च। संहितायां मन्त्राणां संग्रहः वर्तते। मन्त्रेषु देवतास्तुतयः भवन्ति। ब्राह्मणग्रन्थेषु मन्त्राणां व्याख्या यज्ञादिकर्मणां वर्णनं च अस्ति। आरण्यकेषु मन्त्राणां दार्शनिकं विवेचनं कृतं वर्तते। उपनिषत्सु गूढतत्त्वानां निरूपणमस्ति। *ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः* इति चत्वारः वेदाः सन्ति। *ऋग्वेदे* ऋचः *सामवेदे* गेयमन्त्राः *यजुर्वेदे* यज्ञकर्मसम्बद्धाः मन्त्राः *अथर्ववेदे* च विविधविषयकाः मन्त्राः सन्ति। *आयुर्वेदः धनुर्वेदः गान्धर्ववेदः अर्थवेदः* च उपवेदाः सन्ति।

षड् वेदाङ्गानि – शिक्षा कल्पः व्याकरणं निरुक्तं छन्दः ज्योतिषं च।

© NCERT not to be republished

| | | |
|---|---|---|
| *शिक्षा* | – | वर्णानाम् उत्पत्ति-उच्चारण-स्थान-प्रयत्नादीन् शिक्षयति। |
| *कल्पः* | – | यज्ञकर्मणां विधिं बोधयति। |
| *व्याकरणम्* | – | शब्दानां साधुता-असाधुतादीनां ज्ञानं कारयति। |
| *निरुक्तम्* | – | शब्दानां व्युत्पत्तिम् अर्थं च स्पष्टयति। |
| *छन्दः* | – | वैदिकछन्दसां ज्ञानं ददाति। |
| *ज्योतिषम्* | – | कालग्रहनक्षत्रादीनां ज्ञानं ददाति। |



## यस्तु क्रियावान् मनुजः स विद्वान्

१. भवतां विद्यालयस्य You tube धारावाहिन्याम् 'अस्माकं वैदिकं वाङ्मयम्' इत्यस्मिन् विषये एकं लघुचलच्चित्रं प्रसारणीयम् तदर्थम् एकां पटकथां लिखन्तु। लेखनकाले एते अंशाः क्रमेण चिन्तनीयाः —

- अभिवादनम्
- विषयपरिचयः
- वेदाः
- उपवेदाः
- वेदाङ्गानि
- शास्त्राणि
- उपसंहारः

२. पाठे द्वात्रिंशतः विद्यानां चतुष्षष्टेः कलानां च उल्लेखः अस्ति। भवती/भवान् ग्रन्थालयं गत्वा तत्रत्यानां ग्रन्थानां साहाय्येन, शिक्षकाणां मार्गदर्शनेन, अन्तर्जालमाध्यमस्य वा साहाय्येन तासां नामानि संकलयतु। कस्याश्चित् एकस्याः कलायाः विद्यायाः वा वैशिष्ट्यानि प्रतिपादयतु।

© NCERT not to be republished